जयतु संस्कृतम् ॥ श्रीराधागोविन्दाभ्यां नमः ॥ जयतु भारतम्

# सुलभ-ज्योतिष-मार्त्तण्डः



## ज्यौतिषशास्त्रस्य स्कन्धत्रयम्
## ( THREE PARTS OF ASTROLOGY )



ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः॥

बृहत्संहिता, वराहमिहिराचार्यविरचितं, १/६

सिद्धान्तसंहिताहोरूपं स्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुत्तमम्॥

नारदसंहिता, प्रथमोध्यायः, श्लोकः ३

### ज्यौतिषम्
### ASTROLOGY

ज्यौतिषशास्त्रस्य कतिपयाचार्याः
'ज्यौतिषं पञ्चस्कन्धात्मकमिति' (होरा-गणित-संहिता-प्रश्न-शकुनाः) कथयन्ति। उक्तं च केनचित् -
पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।
केरलिः शकुनं चेति ज्योतिःशास्त्रमुदीरितम्॥

भारतीयज्यौतिषशास्त्रस्येतिहासः, लोकमणिदहालविरचितः, पृ. सं. ५

### होरा
### HORARY

होराशास्त्रेऽपि च राशिहोराद्रेष्काणनवांशकद्वादश-भागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थान-कालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहोनिषेक-जन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दाय-दशान्तर्दशाष्टकवर्गराजयोगद्विग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रयभावावलोक-निर्याणगत्यनूकानि तत्कालप्रश्नशुभाशुभनिमित्तानि विवाहादीनां च कर्मणां कारणमित्यादयः।

बृहत्संहिता, वराहमिहिराचार्यः, सांवत्सरसूत्राध्यायः/१८

### सिद्धान्तः
### ASTRONOMY

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः
क्रमाच्चारश्च द्युसदां द्विधा च गणितं
प्रश्नस्तथासोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि
यत्रोच्यते सिद्धान्तः स उदाहृतोऽत्र
गणितस्कन्धप्रबन्धे बुधैः॥

सिद्धान्तशिरोमणिः, भास्कराचार्यविरचितम्, १/६

### संहिता
### SAMHITA

दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृतिप्रमाणवर्णकिरणद्युति-संस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः। सप्तर्षिचारः। ग्रहभक्तयोनक्षत्रव्यूह - ग्रहश्रृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनोल्कादिग्दाहक्षितिचलन सन्ध्याराग - गन्धर्वनगररजोनिर्घातार्घकाण्डसस्यजन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायस विद्यान्तरचक्रमृगचक्रश्वचक्रवातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापनवृक्षायु र्वेदोदगार्गलनीराञ्जनखञ्जनकोत्पातशान्तिमयूरचित्रकघृतकम्बलखड्गपट्ट - कृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तःपुरचिन्तापिटकलक्षणोपानच्छेदव स्त्रच्छेदचामरदण्डशयनाऽऽसनलक्षणरत्नपरीक्षा दीपलक्षणं दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्य -कर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निश - मवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारः कर्तव्याः। तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्या नैर्ऋती चान्येनैवं वारुणी वायव्या चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति। तस्याश्चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षोपघातादिभिः फलानि भवन्ति।

बृहत्संहिता, वराहमिहिराचार्यः, सांवत्सरसूत्राध्यायः/२३

डॉ. मनोजश्रीमालः, सहायकाचार्यः (ज्योतिषविभागः), केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला। दूरभाषः 8894646447

Shrimal Arts